# dakShiNAmUrtivarNamAlAstotram

# દક્ષિણામૂર્તિવર્ણમાલાસ્તોત્રમ્

## Document Information

Text title : dakShiNAmUrtivarNamAlAstotram

File name : dakShiNAvarNamAlA.itx

Category : varNamAlA, shiva, shankarAchArya

Location : doc_shiva

Author : Shankaracharya

Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Latest update : October 27, 2002

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2022

*sanskritdocuments.org*

# દક્ષિણામૂર્તિવર્ણમાલાસ્તોત્રમ્

દક્ષિણામૂર્તિચતુર્વિંશતિવર્ણમાલાસ્તોત્રમ્ ।

ૐમિત્યેતદ્યસ્ય બુધૈર્નામ ગૃહીતં
યદ્ભાસેદં ભાતિ સમસ્તં વિયદાદિ ।
યસ્યાજ્ઞાતઃ સ્વસ્વપદસ્થા વિધિમુખ્યા-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૧॥

નમ્રાઙ્ગાણાં ભક્તિમતાં યઃ પુરુષાર્થા-
ન્દત્વા ક્ષિપ્રં હન્તિ ચ તત્સર્વવિપત્તીઃ ।
પાદામ્ભોજાધસ્તનિતાપસ્મૃતિમીશં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૨॥

મોહધ્વસ્ત્યૈ વૈણિકવૈયાસિકિમુખ્યાઃ
સંવિન્મુદ્રાપુસ્તકવીણાક્ષગુણાન્યમ્ ।
હસ્તામ્ભોજૈર્બિભ્રતમારાધિતવન્ત-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૩॥

ભદ્રારૂઢં ભદ્રદમારાધયિતૃણાં
ભક્તિશ્રદ્ધાપૂર્વકમીશં પ્રણમન્તિ ।
આદિત્યા યં વાઞ્છિતસિદ્ધ્યૈ કરુણાબ્ધિં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૪॥

ગર્ભાન્તઃસ્થાઃ પ્રાણિન એતે ભવપાશ-
ચ્છેદે દક્ષં નિશ્ચિતવન્તઃ શરણં યમ્ ।
આરાધ્યાઙ્ઘ્રિપ્રસ્ફુરદમ્ભોરુહયુગ્મં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૫॥

વક્ત્રં ધન્યાઃ સંસૃતિવાર્ધેરતિમાત્રા-
દ્ભીતાઃ સન્તઃ પૂર્ણશશાઙ્કદ્યુતિ યસ્ય ।

સેવેન્તેઽધ્યાસીનમનન્તં વટમૂલં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૬॥

તેજઃસ્તોમૈરઙ્ગદસંઘટ્ટિતભાસ્વ-
ન્માણિક્યોત્થૈર્ભાસિતવિશ્વો રુચિરૈર્યઃ ।
તેજોમૂર્તિં ખાનિલતેજઃપ્રમુખાબ્ધિં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૭॥

દધ્યાજ્યાદિદ્રવ્યકકર્માણ્યખિલાનિ
ત્યક્ત્વા કાઙ્ક્ષાં કર્મફલેષ્વત્ર કરોતિ ।
યજ્જિજ્ઞાસાં રૂપફલાર્થી ક્ષિતિદેવ-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૮॥

ક્ષિપ્રં લોકે યં ભજમાનઃ પૃથુપુણ્યઃ
પ્રધ્વસ્તાધિઃ પ્રોજ્ઝિતસંસૃત્યખિલાર્તિઃ ।
પ્રત્યગ્ભૂતં બ્રહ્મ પરં સન્રમતે ય-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૯॥

ણાનેત્યેવં યન્મનુમધ્યસ્થિતવર્ણા-
ન્ભક્તાઃ કાલે વર્ણગૃહીત્યૈ પ્રજપન્તઃ ।
મોદન્તે સંપ્રાપ્તસમસ્તશ્રુતિતન્ત્રા-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૧૦॥

મૂર્તિશ્છાયાનિર્જિતમન્દાકિનિકુન્દ-
પ્રાલેયામ્ભોરાશિસુધાભૂતિસુરેભા ।
યસ્યાભ્રાભા હાસવિધૌ દક્ષશિરોધિ-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૧૧॥

તપ્તસ્વર્ણચ્છાયજટાજૂટકટાહ-
પ્રોદ્યદ્વીચીવલ્લિવિરાજત્સુરસિન્ધુમ્ ।
નિત્યં સૂક્ષ્મં નિત્યનિરસ્તાખિલદોષં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૧૨॥

યેન જ્ઞાતેનૈવ સમસ્તં વિદિતં સ્યા-
દ્યસ્માદન્યદ્વસ્તુ જગત્યાં શશશૃઙ્ગમ્ ।
યં પ્રાપ્તાનાં નાસ્તિ પરં પ્રાપ્યમનાદિં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૧૩॥

મત્તો મારો યસ્ય લલાટાક્ષિભવાગ્નિ-
સ્ફૂર્જત્કીલપ્રોષિતભસ્મીકૃતદેહઃ ।
તદ્ભસ્માસીદ્યસ્ય સુજાતઃ પટવાસ-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૧૪॥

હ્યમ્ભોરાશૌ સંસૃતિરૂપે લુઠતાં ત-
ત્પારં ગન્તું યત્પદભક્તિર્દૃઢનૌકા ।
સર્વારાધ્યં સર્વગમાનન્દપયોનિધિં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૧૫॥

મેધાવી સ્યાદિન્દુવતંસં ધૃતવીણં
કર્પૂરાભં પુસ્તકહસ્તં કમલાક્ષમ્ ।
ચિત્તે ધ્યાયન્યસ્ય વપુર્દ્રાઙ્નિમિષાર્ધં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૧૬॥

ધામ્નાં ધામ પ્રૌઢરુચીનાં પરમં ય-
ત્સૂર્યાદીનાં યસ્ય સ હેતુર્જગદાદેઃ ।
એતાવાન્યો યસ્ય ન સર્વેશ્વરમીડ્યં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૧૭॥

પ્રત્યાહારપ્રાણનિરોધાદિસમર્થૈ-
ર્ભક્તૈર્દાન્તૈઃ સંયતચિત્તૈર્યતમાનૈઃ ।
સ્વાત્મત્વેન જ્ઞાયત એવ ત્વરયા ય-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૧૮॥

જ્ઞાંશીભૂતાન્પ્રાણિન એતાન્ફલદાતા
ચિત્તાન્તઃસ્થઃ પ્રેરયતિ સ્વે સકલેઽપિ ।
કૃત્યે દેવઃ પ્રાક્તનકર્માનુસરઃ સં-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૧૯॥

પ્રજ્ઞામાત્રં પ્રાપિતસંબિન્નિજભક્તં
પ્રાણાક્ષાદેઃ પ્રેરયિતારં પ્રણવાર્થમ્ ।
પ્રાહુઃ પ્રાજ્ઞા વિદિતાનુશ્રવતત્ત્વા-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૨૦॥

યસ્યાંજ્ઞાનાદેવ નૃણાં સંસૃતિબોધો

યસ્ય જ્ઞાનાદેવ વિમોક્ષો ભવતીતિ ।
સ્પષ્ટં બ્રૂતે વેદશિરો દેશિકમાદ્યં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૨૧॥

છન્નેઽવિદ્યારૂપપટેનૈવ ચ વિશ્વં
યત્રાધ્યસ્તં જીવપરેશત્વમપીદમ્ ।
ભાનોર્ભાનુષ્વમ્બુવદસ્તાખિલભેદં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૨૨॥

સ્વાપસ્વપ્નૌ જાગ્રદવસ્થાપિ ન યત્ર
પ્રાણશ્ચેતઃ સર્વગતો યઃ સકલાત્મા ।
કૂટસ્થો યઃ કેવલસચ્ચિત્સુખરૂપ-
સ્તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૨૩॥

હા હેત્યેવં વિસ્મયમીયુર્મુનિમુખ્યા
જ્ઞાતે યસ્મિન્સ્વાત્મતયાનાત્મવિમોહઃ ।
પ્રત્યગ્ભૂતે બ્રહ્મણિ યાતઃ કથમિત્થં
તં પ્રત્યઞ્ચં દક્ષિણવક્ત્રં કલયામિ ॥ ૨૪॥

યૈષા રમ્યૈર્મત્તમયૂરાભિધવૃત્તૈ-
રાદૌ ક્લૃપ્તા યન્મનુવર્ણૈર્મુનિભઙ્ગી ।
તામેવૈતાં દક્ષિણવક્ત્રઃ કૃપયાસા-
વૂરીકુર્યાદ્દેશિકસમ્રાટ્ પરમાત્મા ॥ ૨૫॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ
શ્રીદક્ષિણામૂર્તિવર્ણમાલાસ્તોત્રં સંપૂર્ણમ્ ॥

Encoded and proofread by Sridhar Seshagiri seshagir at engineering.sdsu.edu

*dakShiNAmUrtivarNamAlAstotram*
pdf was typeset on January 14, 2022

Please send corrections to *sanskrit@cheerful.com*